# Mantrika Upanishad

# મન્ત્રિકોપનિષત્ અથવા ચૂલિકોપનિષત્

## Document Information

Text title : Mantrika Upanishad

File name : mantrika.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 32/108; Shuklayajurveda Samanya upanishad

Latest update : Jan. 11, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 17, 2022

*sanskritdocuments.org*

# મન્ત્રિકોપનિષત્ અથવા ચૂલિકોપનિષત્

સ્વાવિદ્યાદ્વયતત્કાર્યાપહ્નવજ્ઞાનભાસુરમ્ ।
મન્ત્રિકોપનિષદ્વેદ્યં રામચન્દ્રમહં ભજે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અષ્ટપાદં શુચિં હંસં ત્રિસૂત્રમણુમવ્યયમ્ ।
ત્રિવર્ત્માનં તેજસોહં સર્વતઃપશ્યન્ન પશ્યતિ ॥ ૧॥

ભૂતસંમોહને કાલે ભિન્ને તમસિ વૈખરે ।
અન્તઃ પશ્યન્તિ સત્ત્વસ્થા નિર્ગુણં ગુણગહ્વરે ॥ ૨॥

અશક્યઃ સોઽન્યથા દ્રષ્ટું ધ્યાયમાનઃ કુમારકૈઃ ।
વિકારજનનીમજ્ઞામષ્ટરૂપામજાં ધ્રુવામ્ ॥ ૩॥

ધ્યાયતેઽધ્યાસિતા તેન તન્યતે પ્રેર્યતે પુનઃ ।
સૂયતે પુરુષાર્થં ચ તેનૈવાધિષ્ઠિતં જગત્ ॥ ૪॥

ગૌરનાદ્યન્તવતી સા જનિત્રી ભૂતભાવિની ।
સિતાસિતા ચ રક્તા ચ સર્વકામદુઘા વિભોઃ ॥ ૫॥

પિબન્ત્યેનામવિષયામવિજ્ઞાતાં કુમારકાઃ ।
એકસ્તુ પિબતે દેવઃ સ્વચ્છન્દોઽત્ર વશાનુગઃ ॥ ૬॥

ધ્યાનક્રિયાભ્યાં ભગવાન્ભુઙ્ક્તેઽસૌ પ્રસહદ્વિભુઃ ।
સર્વસાધારણીં દોગ્ધ્રીં પીયમાનાં તુ યજ્વભિઃ ॥ ૭॥

પશ્યન્ત્યસ્યાં મહાત્માનઃ સુવર્ણં પિપ્પલાશનમ્ ।
ઉદાસીનં ધ્રુવં હંસં સ્નાતકાધ્વર્યવો જગુઃ ॥ ૮॥

શંસન્તમનુશંસન્તિ બહ્વૃચાઃ શાસ્ત્રકોવિદાઃ ।

રથન્તરં બૃહત્સામ સપ્તવૈધૈસ્તુ ગીયતે ॥ ૯॥

મન્ત્રોપનિષદં બ્રહ્મ પદક્રમસમન્વિતમ્ ।
પઠન્તિ ભાર્ગવા હ્યેતે હ્યથર્વાણો ભૃગૂત્તમાઃ ॥ ૧૦॥

સબ્રહ્મચારિવૃત્તિશ્ચ સ્તમ્ભોઽથ ફલિતસ્તથા ।
અનડ્વાન્રોહિતોચ્છિષ્ટઃ પશ્યન્તો બહુવિસ્તરમ્ ॥ ૧૧॥

કાલઃ પ્રાણશ્ચ ભગવાન્મૃત્યુઃ શર્વો મહેશ્વરઃ ।
ઉગ્રો ભવશ્ચ રુદ્રશ્ચ સસુરઃ સાસુરસ્તથા ॥ ૧૨॥

પ્રજાપતિર્વિરાટ્ ચૈવ પુરુષઃ સલિલમેવ ચ ।
સ્તૂયતે મન્ત્રસંસ્તુત્યૈરથર્વવિદિતૈર્વિભુઃ ॥ ૧૩॥

તં ષડ્વિંશક ઇત્યેતે સપ્તવિંશં તથાપરે ।
પુરુષં નિર્ગુણં સાઙ્ખ્યમથર્વશિરસો વિદુઃ ॥ ૧૪॥

ચતુર્વિંશતિસંખ્યાતં વ્યક્તમવ્યક્તમેવ ચ ।
અદ્વૈતં દ્વૈતમિત્યાહુસ્ત્રિધા તં પઞ્ચધા તથા ॥ ૧૫॥

બ્રહ્માદ્યં સ્થાવરાન્તં ચ પશ્યન્તિ જ્ઞાનચક્ષુષઃ ।
તમેકમેવ પશ્યન્તિ પરિશુભ્રં વિભું દ્વિજાઃ ॥ ૧૬॥

યસ્મિન્સર્વમિદં પ્રોતં બ્રહ્મ સ્થાવરજઙ્ગમમ્ ।
તસ્મિન્નેવ લયં યાન્તિ સ્રવન્ત્યઃ સાગરે યથા ॥ ૧૭॥

યસ્મિન્ભાવાઃ પ્રલીયન્તે લીનાશ્ચાવ્યક્તતાં યયુઃ ।
પશ્યન્તિ વ્યક્તતાં ભૂયો જાયન્તે બુદ્બુદા ઇવ ॥ ૧૮॥

ક્ષેત્રજ્ઞાધિષ્ઠિતં ચૈવ કારણૈર્વિદ્યતે પુનઃ ।
એવં સ ભગવાન્દેવં પશ્યન્ત્યન્યે પુનઃ પુનઃ ॥ ૧૯॥

બ્રહ્મ બ્રહ્મેત્યથાયાન્તિ યે વિદુર્બ્રાહ્મણાસ્તથા ।
અત્રૈવ તે લયં યાન્તિ લીનાશ્ચાવ્યક્તશાલિનઃ ॥

લીનાશ્ચાવ્યક્તશાલિન ઇત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ મન્ત્રિકોપનિષત્સમાપ્તા ॥

ચૂલિકોપનિષદ્

Encoded and proofread by Sunder Hattangadi

*Mantrika Upanishad*

pdf was typeset on July 17, 2022

Please send corrections to *sanskrit@cheerful.com*